[KYV TB 4-42-5]

ॐ पृथिवी शान्ता साऽग्निना शान्ता सा मे शान्ता शुचꣳ शमयतु ।

ॐ pṛthivī śhān’tā sā (a)g’ninā śhān’tā sā mē
śhān’tā śhuchagm’ śhamayatu ।

अन्तरिक्षꣳ शान्तं तद्वायुना शान्तं तन्मे शान्तꣳ शुचꣳ शमयतु ।

an’tarik’ṣhagm’ śhān’tan’ tad’vāyunā śhān’tan’
tan’mē śhān’tagm’ śhuchagm’ śhamayatu ।

द्यौश्शान्ता साऽऽदित्येन शान्ता सा मे शान्ता शुचꣳ शमयतु ।

dyauśh’śhān’tā sā (ā)dit’yēna śhān’tā sā mē
śhān’tā śhuchagm’ śhamayatu ।

पृथिवी शान्तिरन्तरिक्षꣳ शान्तिर्द्यौः शान्तिर्दिशः शान्तिरवान्तरदिशाः शान्तिरग्निः शान्तिर्वायुः शान्तिरादित्यः शान्तिश्चन्द्रमाः शान्तिर्नक्षत्राणि शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्गौः शान्तिरजा शान्तिरश्वः शान्तिः पुरुषः शान्तिर्ब्रह्म शान्तिर्ब्राह्मणः शान्तिः शान्तिरेव शान्तिः शान्तिर्मे , अस्तु शान्तिः । ॐ शान्तिः शान्तिः शान्तिः ॥

pṛthivī śhān’tiran’tarik’ṣhagm’ śhān’tir’dyauśh’
śhān’tir’diśhaśh’ śhān’tiravān’taradiśhāśh’
śhān’tirag’niśh’ śhān’tir’vāyuśh’ śhān’tirādit’yaśh’
śhān’tiśh’chan’dramāśh’ śhān’tir’nak’ṣhat’rāṇi
śhān’tirāpaśh’ śhān’tirōṣhadhayaśh’
śhān’tir’vanas’patayaśh’ śhān’tir’gauśh’ śhān’tirajā
śhān’tiraśh’vaśh’ śhān’ti[fp]’ puruṣhaśh’
śhān’tir’bram’ha śhān’tir’brām’haṇaśh’ śhān’tiśh’
śhān’tirēva śhān’tiśh’ śhān’tir’mē , as’tu śhān’tiḥi ।
ॐ śhā-n’tiśh’ śhā-n’tiśh’ śhā-n’tiḥi ॥